प्रवीणपुरी महाकाव्य

इ. पु. ८२

इ. पु. पु. आ.

२६८५
६८९
आर
१३५

श्रीः

ाला-मुखी-माहात्म्यम्

महन्त-भरपूरनाथेन.

नेपाल-पाशुपतमुद्रणयन्त्रालये.

संमुद्र्य.

सज्जनेभ्यो विना मूल्यं वितरितुं
प्रकाशितम्.

संवत् १९७९

प्रकटनम्.

प्रियमहानुभावाः ।

विदितमस्तु भवताम्, यत्, पुरुषार्थचतुष्टयसाधकं नेपाल राज्यान्तर्गतदुर्लभ (दुल्लुदैलेख) गिरिस्थितज्वालामुखीमाहात्म्यं सर्वजनसौलभ्याय मुद्रयित्वा विना मूल्यं वितीर्य भवतां महानुभावानां सेवा विधेयेति बहोः कालाद् मम मानसिकोऽभिलाष आसीत्, नापारयं तदिच्छां विना स्वाभिलाषपूर्तये ।

संप्रति भक्तमनोरथकल्पलतिकायास्तस्या एव भगवत्या निस्तुलकरुणोदयाद् भवत्सेवाकृतौ लब्धसौभाग्यतया मुद्रयित्वा प्रकाशितवानस्मि.

इदं पुस्तकं लघुलघ्वपि भगवतीमाहात्म्यस्य महत्तया पुरुषार्थचतुष्टयसाधनं विदित्वा साऽऽग्रहं साऽनुरागं सकौतुकं च ग्रहीष्यन्ति महात्मानो भवन्त इति मदीयो मानसोऽभिलाषः

इदं पुस्तकं येषां करकमलेषूपह्रियते, ये चैतत्पुस्तकजिघृक्षया स्वाभिलाषं प्रदर्श्य स्वीकुर्वन्ति, उभये ते पुस्तकमाद्यन्तं वाचयित्वा सफलयन्तु ममैतत्पुस्तकप्रकाशनप्रयासमिति साञ्जलिबन्धं प्रार्थयते भवतः,

विद्वच्चरणपङ्कजचञ्चरीको महन्तो भरपूरनाथः
पशुपति–गोरक्षनाथ–मन्दिरम्.
नेपाल (राजधानी)

आगत २६५
पूर्ण आर
३६८-१

श्रीः

श्रीगणेशाय नमः

ज्वाला-मुखी-माहात्म्यम् ॥

ऋषय ऊचुः ॥

सूत सूत महाप्राज्ञ तव वक्त्राद्विनिर्गताम् ॥
कथासुधां निपीयाऽपि न तृप्यामो वयं क्वचित् ॥१॥
कथयस्व प्रसादेन हिमवत्खण्डमध्यगम् ॥
क्षेत्रं वैश्वानरं पुण्यं यत्र ज्वाला विनिर्गता ॥ २ ॥

सूत उवाच ॥

साधु पृष्टं महाभाग ! भवद्भिर्वह्निसंज्ञितम् ॥
क्षेत्रमत्यद्भुतं चास्ति महापुण्यप्रदायकम् ॥ ३ ॥
वक्ष्यामि तस्य माहात्म्यमगस्त्याय यथा पुरा ॥
वर्णितं कार्तिकेयेन सर्वपापप्रणाशनम् ॥ ४ ॥

अगस्त्य उवाच ॥

भगवन् ! भवसंभूते ! सर्वशास्त्रविशारद ! ॥
वद लोकहितार्थाय क्षेत्रं पावकसंज्ञितम् ॥ ५ ॥

स्कन्द उवाच ॥

अस्ति क्षेत्रं महागुह्यं हिमवत्पार्श्वसंस्थितम् ॥
यत्र ज्वालास्वरूपेण सदा पावकसंस्थितिः ॥ ६ ॥
वाराणस्याः प्रयागाच्च मायापुर्या विशेषतः ॥
इदं क्षेत्रं महापुण्यं कलौ कल्मषनाशनम् ॥ ७ ॥
सर्वलोकोपकाराय तीर्थमेतत् प्रकाशितम् ॥
माहात्म्यमस्य तीर्थस्य युगमेवावतिष्ठते ॥ ८ ॥
पुरा कृतयुगे शम्भुर्हिमाद्रेरुत्तरे तटे ॥
ब्रह्मयोगं समादाय समाधिस्थो बभूव ह ॥ ९ ॥
बहुकालं गतस्तस्य समाधिमधितिष्ठतः ॥
तथापि न प्रबुद्धोऽभूद्ब्रह्माऽऽनन्दपरिप्लुतः ॥ १० ॥
तदा भयं समुपन्नमसत्यं त्रिदिवौकसाम् ॥
व्याप्तं त्रैलोक्यमखिलं दैत्यैः परमदुर्जयैः ॥ ११ ॥
वीक्ष्यैतद् व्यसनं घोरं शक्रो व्याकुलमानसः ॥
देवानाहूय सदसि प्रत्युवाच हतप्रभः ॥ १२ ॥
देवाः संशृणुतेदानीं भगवान् विश्वभावनः ॥
भवो भवार्तिशमनः समाधिमधितिष्ठति ॥ १३ ॥
तदभावाद्वयं सर्वे पितृहीनाः सुता इव ॥
सीदामो दितिजत्रासान्न विन्दामः शमं क्वचित् ॥१४॥
अतोऽस्माभिर्मिलित्वैव योगस्थोऽपि महेश्वरः ॥
बोधितव्यः प्रयत्नेन निजकल्याणहेतवे ॥ १५ ॥

उपायः शोच्यतामत्र भवद्भिर्बुद्धिमत्तरैः ॥
प्रबुद्धो येन भगवान् भवभीतिं विभीषयेत् ॥ १६ ॥
श्रुत्वैतद् वचनं सम्यग् देवदेवस्य धीमतः ॥
अन्योन्यं मन्त्रयाञ्चक्रुः सुरा गुरुपुरःसराः ॥ १७ ॥
क्षणं विचार्य मदनं बहुमानपुरःसरम् ॥
पुरोधायाऽब्रुवन् देवास्ततः शक्रस्य शृण्वतः ॥ १८ ॥
मन्मथोऽयं महाराज ! कार्येऽस्मिन् सन्नियोज्यताम् ॥
यत्प्रभावान्मुनीनां च मनो भवति विद्रुतम् ॥ १९ ॥
वसन्तेनाप्सरोभिश्च सह गत्वा महेश्वरम् ॥
मोहयत्वाशु देवोऽयं जगत्क्षेमं विचिन्तयन् ॥ २० ॥
विहायैनं महेशस्य बोधने कोऽपि न क्षमः ॥
अतः संप्रेष्यतां शीघ्रं कार्यार्थं शिवसन्निधौ ॥ २१ ॥
इत्याकर्ण्य वचः शक्रो देवानां युक्तिसंयुतम् ॥
धूर्जटेर्ध्यानभङ्गाय मीनकेतुं समादिशत् ॥ २२ ॥
ततः सख्या वसन्तेन ह्यप्सरोभिश्च सङ्गतः ॥
गत्वा तु शिवसान्निध्यं स्मरः स्मेरमुखोऽभवत् ॥ २३ ॥
वसन्तः पुष्पितः श्रीमान् ननृतुश्चाप्सरोगणाः ॥
जगुर्गन्धर्वपतयः क्षुब्धं हरमनोऽभवत् ॥ २४ ॥
शनैः कोपानलज्वाला निःसृता हरनेत्रतः ॥
भस्मीचकार मदनं हाहाकारो महानभूत् ॥ २५ ॥
व्याकुलं हिमवच्छृङ्गं न ज्वाला शान्तिमाययौ ॥

व्युत्थितो भगवान् शम्भुः स्मरं दग्धं व्यलोकयत् ॥२६॥
अनुतप्य क्षणं पश्चान्निजनेत्रसमुद्भवाम् ॥
ज्वालां समाक्षिपच्छम्भुः सन्निकृष्य समन्ततः ॥२७॥
तेन क्षिप्ता च सा ज्वाला हिमाद्रेर्दक्षिणे तटे ॥
दुर्लभाख्यगिरेः पार्श्वे पतित्वाऽनेकधा भवत् ॥२८॥
तस्याः स्थानत्रयं जातं शिरो नाभिश्च पादुका ॥
तत्र सन्निहिता देवास्तीर्थानि सरितस्तथा ॥ २९ ॥
दर्शनात् स्पर्शनाच्चैव पूजनाद्भवनात्तथा ॥
मुक्तिदा सा महादेवी ज्वाला पावकरूपिणी ॥ ३० ॥
ततःप्रभृति भो ब्रह्मन् तत् स्थानं जगतीतले ॥
ज्वालाक्षेत्रमिति ख्यातं बभूव शुभदायकम् ॥३१॥
तस्य मध्यप्रदेशं तु धूलिस्थानं निगद्यते ॥
तत्र तिष्ठन्ति सर्वेऽपि देवा लोकहिताय च ॥ ३२ ॥
पुरस्तात्तु ह्यधोभागे क्षीरतीर्थं तथा परम् ॥
ब्रह्मकुण्डं ततः पुण्यं कुण्डममृतसंज्ञकम् ॥ ३३ ॥
एतयोः स्नानमाहात्म्यं मया वक्तुं न शक्यते ॥
धूलिस्थानस्य नैर्ऋत्ये ह्यधोभागे च पादुका ॥३४॥
प्राङ्मुखावह्निसहिता भुक्तिमुक्तिफलप्रदा ॥
ततो नैर्ऋत्यभागे तु स्वयं तिष्ठाम्यहं मुने ॥ ३५ ॥
पादुकोत्तरपार्श्वे तु विद्यते च महानदी ॥
भैरवीति समाख्याता सर्वपापप्रणाशिनी ॥ ३६ ॥

पूर्ण आर

तत्र स्नानं तथा श्राद्धं गयातुल्यं भवेन्मुने ! ॥
होमदानादिकं चापि ह्यक्षयं फलमृच्छति ॥ ३७ ॥
ब्रह्मकुण्डस्य चोदीच्यां बाणगङ्गा प्रदृश्यते ॥
गङ्गा च यमुना चैव चन्द्रभागा सरस्वती ॥ ३८ ॥
तथा चोर्ध्वमुखी गङ्गा क्षेत्रस्य प्रियकाम्यया ॥
तिष्ठन्ति मुनिशार्दूल तथाऽन्याः सरितोऽपि च ॥ ३९ ॥
आसु स्नानं तथा दानं श्राद्धं पूजादि यत्कृतम् ॥
तत् सर्वं कोटिगुणितं प्रसूते फलमव्ययम् ॥ ४० ॥
ततोऽग्रे वर्ततेऽगस्त्यलिङ्गं रौद्रं मनोहरम् ॥
पूजनाद्दर्शनात् सद्यो महापातकनाशनम् ॥ ४१ ॥
तस्याग्रे कामधेनुश्च मोक्षधेनुरपि स्फुटम् ॥
कपालमोक्षणं चापि ब्रह्महत्याविनाशकम् ॥ ४२ ॥
ऋणमोचनकं चान्यत् पापमोचनकं तथा ॥
दृश्यते तीर्थनिकरं वाञ्छितार्थप्रदं नृणाम् ॥ ४३ ॥
ततः किंचित् पुरस्तात्तु स्वयं विष्णुः सनातनः ॥
धर्मराज इति ख्यातः सह भीमेन तिष्ठति ॥ ४४ ॥
नारसिंहस्वरूपेण हरेश्चैव तु संस्थितिः ॥
दृश्यते पुरतस्तस्माल्लोमशस्य मुनेरपि ॥ ४५ ॥
दर्शनं पूजनं चैषां सप्तजन्म सुखप्रदम् ॥
कीर्तितं सर्वलोकानां वाञ्छासिद्धिकरं तथा ॥ ४६ ॥
ततो गिरेरधस्तात्तु शिवस्थानं निगद्यते ॥

श्वेतवर्णमहारेणुर्दृश्यते तत्र सर्वदा ॥ ४७ ॥
तत्रस्थं रेणुमादाय ललाटे तिलकं तथा ॥
सर्वाङ्गोद्धूलनं चापि सर्वरोगप्रणाशनम् ॥ ४८ ॥
शिवस्थानादधः पुण्या कर्मभूमिः प्रदृश्यते ॥
सर्वकर्मणि सा चेष्टा यत्र ज्वालाऽमृता स्थिता ॥ ४९ ॥
तस्याः स्पर्शनमात्रेण दिव्यदेहः प्रजायते ॥
निरामयो नरः सद्यो महारोगयुतोऽपिच ॥ ५० ॥
इन्द्रियाख्यं स्वयंज्योतिर्दृश्यते तत एव हि ॥
पुत्रदं सिद्धिदं चापि प्रसिद्धं जगतीतले ॥ ५१ ॥
नाभिस्थानं तु तत्रैव ज्वालादेव्याः प्रकीर्तितम् ॥
तृप्यन्ति पितरो देवाः कृतैस्तत्र सुकर्मभिः ॥ ५२ ॥
तस्मिन् स्थाने मृता ये च नराः कीटपतङ्गकाः ॥
सर्वेऽपि शिवरूपेण रमन्ते शिवसन्निधौ ॥ ५३ ॥
तत्र दानं च श्राद्धं च जपो होमश्च पूजनम् ॥
क्रियते मनुजैर्विप्र! फलाऽऽनन्त्याय कल्पते ॥ ५४ ॥
मिष्टान्नैर्भोजयेद्यस्तु विप्रमेकमपि स्वयम् ॥
भोजने कोटिविप्रस्य सम्यक्फलमवाप्नुयात् ॥ ५५ ॥

इति स्कन्दपुराणे हिमवत्खण्डान्तर्गतज्वालाक्षेत्रमाहात्म्ये
प्रथमो ध्यायः १

अगस्त्य उवाच ॥

देवदेव ! महादेवसूनो ! भूयोऽपि कथ्यताम् ॥
पावकक्षेत्रसंस्थानं स्थानानां महिमा प्रभो ॥ १ ॥

स्कन्द उवाच ॥

नाभिस्थानादधः पुण्यं भृगुस्थानं प्रकीर्तितम् ॥
देहत्यागाच्च तत्रैव मुक्तिः करतले स्थिता ॥ २ ॥
ततः पूर्वं नदीतीरे केदारेश्वरमव्ययम् ॥
दृष्ट्वा संपूज्य विप्रेन्द्र ! पुनर्जन्म न विद्यते ॥ ३ ॥
ततः प्राच्यामधोभागे ब्रह्महत्याविमुक्तिदम् ॥
ब्रह्मकुण्डं तथा विष्णुशिवकुण्डं तथा परम् ॥ ४ ॥
अमृतं कुण्डमप्यस्ति कुण्डं रासातलं तथा ॥
दृश्यन्ते निर्मलाकाराः कुण्डाः पापहराः शुभाः ॥ ५ ॥
दृश्यन्ते चाग्निकुण्डेऽस्मिन् ज्वालास्तिस्रो मनोहराः ॥
हवनं पूजनं स्नानं तत्र मोक्षप्रदं नृणाम् ॥ ६ ॥
क्षेत्रपालस्ततः पूज्यो यात्राफलमभीप्सुभिः ॥
तेन निर्विघ्नतो यात्रा यातॄणां पूर्णतां व्रजेत् ॥ ७ ॥
ततः प्राच्यामधोभागे सारगङ्गा शुभावहा ॥
दृश्यन्ते सुसरित् तस्यां कुर्यात् पिण्डादिकं नरः ॥ ८ ॥
ततः पूर्वं महापुण्या विद्यते ह्युदकासृता ॥
विशालभूमिस्तत्रापि स्नानं श्राद्धं प्रशस्यते ॥ ९ ॥
मोक्षतीर्थं तु तत्रैव ज्वालायाः सन्निधौ शुभम् ॥

पितॄनुद्धर्तुकामो हि तत्र पिण्डान् विनिर्वपेत् ॥ १० ॥
स्वर्णदानं च कुर्वीत श्रद्धया स्वर्गकाम्यया ॥
स्थित्वाऽश्वत्थतरोर्मूले वसुधाकुण्डसन्निधौ ॥ ११ ॥
कोटितीर्थमिति ख्यातं भुक्तिमुक्तिप्रदायकम् ॥
तत्रैव विद्यते तस्मिन् कृतं कर्माऽक्षयं भवेत् ॥ १२ ॥
गृहाच्चलितमात्रेण क्षेत्रं वैश्वानरं प्रति ॥
प्राप्यते चाश्वमेधस्य फलं विप्र ! पदे पदे ॥ १३ ॥
यावदिन्द्रश्च सोमश्च रविस्तिष्ठति तद्गताः ॥
पितृमातृऋणैर्मुक्तास्तावन्मर्त्या भवन्ति च ॥ १४ ॥
श्राद्धकृद्यस्तु क्षेत्रेऽस्मिन्नरस्तारयते कुलम् ॥
आत्मना सह विप्रेन्द्र ! दश पूर्वान् दशापरान् ॥ १५ ॥
पतनात्पशुसंग्रामाद्विषाद्वा पन्नगादपि ॥
मृताः स्युर्मानवा यत्र मुच्यन्ते तेऽपि तत्क्षणात् ॥ १६ ॥
कृमिकीटपतङ्गाश्च पशवोपि तथा परे ॥
ये चात्र संस्थिताः सत्वास्तेऽपि स्वर्गं व्रजन्ति च ॥ १७ ॥
मूर्खा नरा न जानन्ति माहात्म्यं चास्य भूतले ॥
गयातुल्यमिदं क्षेत्रं पितॄणां तारणाय च ॥ १८ ॥
हुतं दानं पूजनं च वैश्वानरशिखामुखे ॥
ससरिद्द्वीपवसुधादानतुल्यफलं भवेत् ॥ १९ ॥
यवास्तिलास्तथा धान्यं घृतं कृत्वा च मिश्रितम् ॥
जुहुयादाहुतीः पञ्च दद्याद् गां च पयस्विनीम् ॥ २० ॥

ब्राह्मणान् भोजयेत् पश्चात् दक्षिणाभिश्च तोषयेत् ॥
तेन तृप्यन्ति देवाश्च पितरः स्वर्गता अपि ॥ २१ ॥
यवव्रीहितिलानां च हुतानां संख्यया समम् ॥
स्थित्वा वर्षगणं स्वर्गे जायते स शुभे कुले ॥ २२ ॥
करोति भूमिदानं च पावकस्य पुरः पुमान् ॥
निवसेत् स तु स्वर्लोके यावदिन्द्राश्चतुर्दश ॥ २३ ॥
मध्ये ब्रह्मशिलायास्तु योऽन्नदानं करोति च ॥
ब्राह्मणान् भोजयेच्चाऽपि तस्य पुण्यमनन्तकम् ॥ २४ ॥
तत्र कृतेन पुण्येन दत्तैः श्राद्धादिकैरपि ॥
निवसन्ति नराः स्वर्गे यावदिन्द्राश्चतुर्दश ॥ २५ ॥
निराहारव्रतं कृत्वा नराः पञ्चत्वमागताः ॥
अपत्नीकाः सपत्नीकास्तेऽपि यान्ति परां गतिम् ॥ २६ ।
ब्रह्मा विष्णुश्च रुद्रश्च यावत्तिष्ठन्ति तावता ॥
कालेन ते नराः स्वर्गं विमानैः संप्रयान्ति च ॥ २७ ॥
वैष्णवाश्च तपोनिष्ठा जितक्रोधा जितेन्द्रियाः ॥
ब्रह्मचर्यव्रतस्थाश्च योगिनोपि विशेषतः ॥ २८ ॥
क्षेत्रं वैश्वानरं प्राप्य म्रियन्ते कालयोगतः ॥
तेऽपि गच्छन्ति परमं पदमाचन्द्रतारकम् ॥ २९ ॥
जन्मजन्मकृतं पापं तेषां चैव विनश्यति ॥
एतेन सदृशं क्षेत्रं नभूतं न भविष्यति ॥ ३० ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चण्डालजातयः ॥

क्षेत्रं वैश्वानरं गन्तुं सर्वेऽप्यर्हन्ति भूतले ॥ ३१ ॥
यत्र वैश्वानरी ज्वाला पयोधारासमन्विता ॥
विनिःसरत्यविच्छिन्ना दृश्यते गिरिगर्ततः ॥ ३२ ॥
प्रज्वलत्यनिशं वह्निर्नानावर्णाकृतिः सदा ॥
विनिर्गत्य स्वयं यत्र मृच्छिलामयभूतलात् ॥ ३३ ॥
क्वचिल्लीनाः क्वचिद्व्यक्ताः क्वचिन्नित्यं प्रदीपिताः ॥
ज्वालाः सूक्ष्मास्तथा स्थूला यत्र सन्ति मनोहराः ॥ ३४ ॥
दृष्ट्वा चैतन्महच्चित्रं कुतूहलसमाकुलम् ॥
पापघ्नं पावकं क्षेत्रं विस्मयं को न विन्दते ॥ ३५ ॥
तपोयोग्यं ध्यानयोग्यं रहस्यातिरहस्यकम् ॥
दुष्प्रापं योगिभिश्चैव क्षेत्रमेतन्न संशयः ॥ ३६ ॥
इन्द्रादयः सुराः सर्वे ब्रह्मविष्णुपुरःसराः ॥
ससरीसृपगन्धर्वविद्याधरनदीनदाः ॥ ३७ ॥
तिष्ठन्ति गुप्तरूपेण लोकानां शुभहेतवे ॥
क्षेत्रेऽस्मिन् पावके ब्रह्मन् भुक्तिमुक्तिफलप्रदाः ॥ ३८ ॥
स्वयं शेषो भवेद्वक्ता स्वयं वै गणपो लिखेत् ॥
तथापि पुरायदं चास्य माहात्म्यं नैव पार्यते ॥ ३९ ॥
यदि मोहात् प्रमादाद्वा विद्याधनमदादपि ॥
निन्दां प्रकुरुते चास्य स तु भस्मीभविष्यति ॥ ४० ॥
अवजानन्ति ये मूढा ज्वालां देवीं सनातनीम् ॥
तत्क्षेत्रस्थाँस्तथा देवान् स्थानानि च विशेषतः ॥ ४१ ॥

हरकोपानलज्वाला कुलमेकोत्तरं शतम् ॥
तेषां करोति चाङ्गारं गृहं धान्यं धनं जनम् ॥४२॥
ये मानयन्ति पूजाभिर्होमैर्दानादिकैरपि ॥
श्राद्धैः श्रद्धायुतैश्चैव हरस्तेषां प्रसीदति ॥ ४३ ॥

इति स्कन्दपुराणोक्तहिमवत्खण्डान्तर्गतज्वालाक्षेत्रमाहात्म्ये
द्वितीयोऽध्यायः ॥ २ ॥

स्कन्द उवाच ॥

शृणु ब्रह्मन्प्रवक्ष्यामि ज्वालाक्षेत्रस्य चोत्तमम् ॥
माहात्म्यसूचकं पुण्यं वृत्तान्तं परमाद्भुतम् ॥ १ ॥
आसीदतीव धर्मात्मा द्विजो भोजकटे पुरा ॥
सर्वशास्त्रार्थतत्वज्ञो ब्रह्मकर्मपरायणः ॥ २ ॥
श्रुतशीलगुणोपेतो द्विजदेवसमर्चकः ॥
देवशर्माऽभिधस्तस्य भार्याऽऽसीदतिकर्कशा ॥३॥
विमुखा गृहकृत्येषु नित्यं कलहकारिणी ॥
व्यभिचाररता पत्युः कष्टदात्री निरङ्कुशा ॥ ४ ॥
एकदा सा विशालाक्षी तीर्थयात्राच्छलेन च ॥
वञ्चयित्वा पतिं गेहान्निश्चक्राम विटैः सह ॥ ५ ॥
विहरन्ती सुखं तैस्तैर्विटैः संभोगलोलुपैः ॥
पश्यन्ती विविधान्देशान् गिरिकाननभूषितान् ॥६॥

क्षेत्रं पाशुपतं प्राप्य वाङ्मतीतटसंस्थिते ॥
मठे वसन्ती सा कालं निनाय बहुवत्सरम् ॥ ७ ॥
नानाविधैः सुदुर्वृत्तैर्विटैर्भुक्तवती सुखम् ॥
संचयं बहुवित्तस्य चक्रे सा मुदिता भृशम् ॥ ८ ॥
ततः कालेन सा सुभ्रूर्जरां प्राप्य सुदुःखिता ॥
रोगग्रस्ता हृतधना तस्करैः पीडिता भृशम् ॥ ९ ॥
अशक्ता प्राणयात्रार्थं काकिणीमप्युपार्जितुम् ॥
भिक्षुकीरूपमास्थाय बभ्राम च गृहे गृहे ॥ १० ॥
जर्जरेण शरीरेण भुक्त्वा च बहुयातनाम् ॥
नेपालदेशं त्यक्त्वैव प्राप सा गण्डकीतटम् ॥ ११ ॥
दिनानि कति चित्तत्र स्थित्वा दुःखेन सा पुनः ॥
प्राप्योदीचीं महारण्ये तरुमूलमुपाविशत् ॥ १२ ॥
तदैव दैवयोगेन व्याघ्रः कश्चित् समागतः ॥
दृष्ट्वा च मानुषीं वृद्धां तां ददाराऽऽमिषाऽऽशया ॥ १३ ॥
तेन व्याघ्रप्रहारेण गतप्राणा च सा यदा ॥
यमदूतैर्गृहीत्वा तु नीता यमपुरं प्रति ॥ १४ ॥
तदा भाग्यवशात्तस्या व्याघ्रभुक्तावशेषितम् ॥
अस्थिखण्डं गृहीत्वा तु गृध्रः कोऽपि नभोगतः ॥ १५ ॥
दुर्लभाख्यगिरिं प्राप्य ज्वालाक्षेत्रान्तरे सुखम् ॥
भोक्तुमारब्धवाँस्तत्र नखैस्तुण्डैर्विदारयन् ॥ १६ ॥
तन्मुखाद् गलितं किञ्चिन्मांसमस्थिशिरादिकम् ॥

ज्वालामध्ये विगलितं भस्मसादभवत्क्षणात् ॥ १७ ॥
एतस्मिन्नेव काले तु याम्यैर्नीता च साऽसती ॥
सद्यो विमानमारुह्य विष्णुदूतैः सुसत्कृता ॥ १८ ॥
जगाम भवनं विष्णोर्दिव्येन वपुषा मुने! ॥
ज्वालाक्षेत्रस्य माहात्म्यं जानीहि परमाद्भुतम् ॥ १९ ॥

अगस्त्य उवाच

धन्योऽहं कृतपुण्योऽहं वह्निक्षेत्रस्य पुण्यदम् ॥
श्रुतं माहात्म्यमतुलं देवानामपि दुर्लभम् ॥ २० ॥
ब्रूहि मे तत्र गत्वा तु स्नात्वा हुत्वा हुताशनम् ॥
समभ्यर्च्य तथा कृत्वा श्राद्धदानादिकानपि ॥ २१ ॥
पुण्यकर्मभिरन्यैश्च किं फलं लभ्यते नरैः ॥
पापानि कानि नश्यन्ति संशयोऽत्र मम प्रभो! ॥ २२ ॥

स्कन्द उवाच ॥

मुने ! वक्ष्याम्यहं सर्वं विस्तरेण तवाऽधुना ॥
वह्निक्षेत्रस्य माहात्म्यं पुण्यदं पापनाशनम् ॥ २३ ॥
ब्रह्मघ्नश्च सुरापश्च स्त्रीघ्नो बालघ्न एव च ॥
वाराणस्यां प्रमुच्यन्ते ते सर्वेऽपि तपोधन! ॥ २४ ॥
वाराणस्यां दशगुणमिदं पावकसंज्ञितम् ॥
विद्धि क्षेत्रं महापुण्यं महापापप्रणाशनम् ॥ २५ ॥
अन्नकूटं तुलाकूटं कन्याभृत्यगवां चयम् ॥
हत्वा समुद्भवं पापं सुवर्णहरणादपि ॥ २६ ॥

दधि दुग्धं घृतं चैव लवणं वस्त्रभाजने ॥
अपहृत्य परक्षेत्रं परदारापकर्षणात् ॥ २७ ॥
गोमांसभक्षणाच्चैव ब्रह्मस्वहरणादपि ॥
उपार्जितं तथाऽन्यच्च ज्ञानतोऽज्ञानतोऽपि वा ॥२८॥
तत्सर्वं लीयते सद्यः क्षेत्रं प्राप्य च पावकम् ॥
सन्देहो नात्र कर्तव्यः सत्यमेतद् ब्रवीमि ते ॥ २९ ॥
अग्निदग्धं यथा स्वर्णं निर्मलं जायते तथा ॥
ज्वालासंस्पर्शमात्रेण शुध्यते पातकी जनः ॥ ३० ॥
यथा दीप्तः सहस्रांशुः सुधापूर्णश्च चन्द्रमाः ॥
शुद्धं च स्फटिकं यद्वद् दृश्यते मानवस्तथा ॥ ३१ ॥
ज्वालाक्षेत्रस्थिता नित्यं ज्वालार्चनरतास्तथा ॥
ये नराः सन्ति ते धन्याः पूज्यास्ते त्रिदशैरपि॥३२॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चाण्डालजातयः ॥
द्विपदाश्च चतुष्पादाः कृमिकीटपतत्रिणः ॥ ३३ ॥
उद्भिदो जलजाश्चैव ह्यण्डजाश्च जरायुजाः ॥
सर्वेऽपि ते प्रमुच्यन्ते क्षेत्रं प्राप्य च पावकम् ॥ ३४ ॥
वैकुण्ठे रुद्रलोके च ब्रह्मलोके तथैव च ॥
यान्ति ते कर्मभोगाय कल्पान्तं भुञ्जते सुखम्॥३५॥

इति स्कन्दपुराणेक्तहिमवत्खण्डान्तर्गतज्वालामाहात्म्ये
तृतीयोऽध्यायः ॥ ३

स्कन्द उवाच ॥

इदं तीर्थं महापुण्यं भुक्तिमुक्तिप्रदायकम् ॥
सेव्यं ब्रह्ममहेशाद्यैर्यक्षविद्याधरोरगैः ॥ १ ॥
सुराऽसुरा नरा नागा ह्यन्ये च स्थिरजङ्गमाः ॥
पञ्चक्रोशात्मके ह्यस्मिन् क्षेत्रे तिष्ठन्ति पावके ॥ २ ॥
मङ्गलध्वनिनादेन पटहैर्भेरिमर्दलैः ॥
वाचालकिन्नरीवीणातुम्बुरीशङ्खनिःस्वनैः ॥ ३ ॥
कुङ्कुमाद्यैः सुगन्धैश्च श्रीखण्डाद्यैश्च चन्दनैः ॥
गुग्गुलागरुकस्तूरीधूपैर्वस्त्रैर्मनोहरैः ॥ ४ ॥
नानाफलसमायुक्तैर्नैवेद्यैर्विविधैरपि ॥
ध्वजचित्रपताकाभिः श्वेतरक्तादिकैस्तथा ॥ ५ ॥
अन्यैश्च विविधैर्द्रव्यैर्ज्वालां देवीं सनातनीम् ॥
पूजयन्ति सदा देवाः सगणा भक्तिसंयुताः ॥ ६ ॥
एतेन सदृशं क्षेत्रं भूतले नास्ति कुत्र चित् ॥
भोगमोक्षप्रदं पुण्यं रम्यं सर्वसुखास्पदम् ॥ ७ ॥
यो यस्य विहितो भावस्तावत्तस्य फलं भवेत् ॥
मूर्खा नरा न जानन्ति तस्य भक्तिक्रियाक्रमम् ॥८॥
मकरस्थे दिवानाथे विशेषेण महामुने! ॥
तिष्ठन्ति त्रिदशाः सर्वे क्षेत्रेऽस्मिन् वह्निसंज्ञिते ॥९॥
तस्मान्माघे प्रकर्तव्या ज्वालादेव्या विशेषतः ॥
होमार्चनादिकाः सर्वाः क्रिया भक्तिपुरःसरम् ॥ १० ॥

पूजितास्त्रिदशास्तैस्तु पूजितो येर्हुताशनः ॥
अनन्तपुण्यमादाय ते यान्ति परमं पदम् ॥ ११ ॥
न तेषां पुनरावृत्तिः स्वर्गलोकात् कदाचन ॥
प्रभावाद्वह्निदेवस्य कुम्भयोने! न संशयः ॥ १२ ॥
जनानामुपकाराय कलिमध्ये प्रकाशितम् ॥
माहात्म्यमस्य क्षेत्रस्य गुह्यं च परमाद्भुतम् ॥ १३ ॥
पञ्चसाहस्रसंख्याता ज्वलन्ति प्रत्यहं मुने! ॥
ज्वालाः कलियुगे विप्र! प्रत्यक्षं तत्र सर्वतः ॥१४॥
नवद्वीपसमायुक्ते भूखण्डेऽस्मिन्महामुने ! ॥
ईदृशो ज्वलमानोऽग्निर्दृश्यते नहि कुत्रचित् ॥१५॥
सत्यात्मा च शुचिर्दक्षो देवद्विजनिषेवकः ॥
ब्रह्मचारी सदा पुण्यः पूजयेच्च हुताशनम् ॥ १६ ॥
अन्येऽपि ये नरा भक्ताः पूजयन्ति हविर्भुजम् ॥
तेऽपि तत्पुण्यसंपूता यान्त्येव परमं पदम् ॥ १७ ॥
अधमाः कृमयश्चैव पतङ्गाश्च सरीसृपाः ॥
सर्वेऽपि पावकक्षेत्रं प्राप्य यान्ति परां गतिम् ॥१८॥
पृथिव्यां व्यक्तरूपेण ज्वलमाने हुताशने ॥
श्राद्धं दानं हुतं प्रायश्चित्तं चाक्षयपुण्यदम् ॥ १९ ॥
सुप्रदीप्तमिदं क्षेत्रं पृथिव्यां पापनाशनम् ॥
तीर्थानामुत्तमं तीर्थं संसारभयनाशनम् ॥ २० ॥
पितॄणामुद्धृतिकरं कुलैरेकोत्तरैः सह ॥

होमदानावगाहाद्यैः पापसंशुद्धिहेतुकम् ॥ २१ ॥
यो नरः पूजयेदत्र देवान् विप्रान् पितॄनपि ॥
स मोदते चिरं स्वर्गे यावदिन्द्राश्चतुर्दश ॥ २२ ॥
दीनो हीनस्तथा स्वस्थो व्याधिभिः पीडितोऽपि वा ॥
निवसन् पावकक्षेत्रे मृतो येनाऽपि कर्मणा ॥ २३ ॥
आचन्द्रतारकं स्वर्गभोगान् भुक्त्वा सुदुर्लभान् ॥
क्षीणे पुण्ये पुनर्जन्म प्राप्नोति विमले कुले ॥ २४ ॥
इदं पुराणं परमं गुह्यं पापहरं शुभम् ॥
अभक्ताय न दातव्यं दातव्यं धार्मिकाय च ॥२५॥
ये शृण्वन्ति सदा भक्त्या पठन्ति परमादरात् ॥
तेषां यान्त्येव पितरः स्वर्गं सम्यक् फलं भवेत्॥२६॥
अश्वमेधशतं चैव राजसूयसहस्रकम् ॥
कृतं तेन विजानीयाद्येन संतर्पितोऽनलः ॥ २७ ॥
गवां कोटीप्रदानस्य पृथ्वीदानस्य यत् फलम् ॥
पुराणश्रवणेनैव प्राप्यते भुवि मानवैः ॥ २८ ॥
अत्रेरितेषु तीर्थेषु स्नानं कृत्वा विशेषतः ॥
पुराणं शृणुयाच्चैतन्नरो भक्त्या समाहितः ॥ २९ ॥
तेन तस्य भवेद्यात्रा शुभदा फलदायिनी ॥
भुक्तिमुक्तिप्रदा शश्वद् महापातकनाशिनी ॥३०॥
वैश्वानरपुराणं हि वह्निमाहात्म्यसूचकम् ॥
सर्वशास्त्रेषु मुनिभिर्गुह्यत्वेन निरूपितम् ॥ ३१ ॥

कथितं ते मुने! स्नेहाद् मयेदं परमार्थदम् ॥
सेवस्व भक्तिभावेन क्षेत्रं पावकसंज्ञितम् ॥ ३२ ॥
शृणु वक्ष्यामि च पुनर्व्यक्ताव्यक्तस्वरूपतः ॥
विद्यन्ते यानि तीर्थानि तत्र पापहराणि च ॥३३॥
द्वयोः पर्वतयोर्मध्ये वर्तते चोत्तरा नदी ॥
तस्यां वै स्नानमात्रेण कुलानां सप्त चोद्धरेत् ॥३४॥
तस्या दक्षिणदिग्भागे सिद्धेश्वरगिरिर्महान् ॥
तस्य दर्शनमात्रेण जायन्ते सर्वसिद्धयः ॥ ३५ ॥
तन्मध्ये यानि तीर्थानि या च पुण्यजला नदी ॥
तत्र स्नानार्चनाद्यैश्च पुनर्जन्म न विद्यते ॥ ३६ ॥
श्राद्धदानादिकं कृत्वा तर्पयित्वा हुताशनम् ॥
भक्त्या चाराध्य देवांश्च लभ्यते वाञ्छितं फलम् ३७
ततः प्राच्यां च यच्छैवं लिङ्गं परमशोभनम् ॥
दृश्यते मुनिशार्दूल! पूजयेत्तद्विधानतः ॥ ३८ ॥
कोटियज्ञफलं तेन मनुष्याणां न दुर्लभम् ॥
भुक्तिमुक्तिफलोपेतं सर्वाशुभविनाशनम् ॥ ३९ ॥
तत्रैव क्षेत्रपालं च दृष्ट्वा संपूज्य यत्नतः ॥
कोटितीर्थफलं सद्यो मानवैः प्राप्यते तदा ॥ ४० ॥
अग्नेर्दक्षिणदिग्भागे धर्मब्रह्मशिले ततः ॥
कर्षरीसंभलौ चैव भृगुतीर्थं च पश्चिमे ॥ ४१ ॥
तेषां स्मरणमात्रेण सहस्रकुलमुद्धरेत् ॥

तैत्रव संस्थिता गङ्गा यमुना च महानदी ॥ ४२ ॥
तत्र श्राद्धं प्रकुर्वीत पितॄणां मोक्षहेतुकम् ॥
मातृवंशे मृता ये च पितृवंशे तथैव च ॥ ४३ ॥
यान्ति ते स्वर्गतिं विप्र! पूजयित्वा हुताशनम् ॥
कृत्वा पापान्यशेषाणि निरये पतिता अपि ॥ ४४ ॥
ततस्तु पश्चिमे भागे पादुकायाश्च चोत्तरे ॥
हंसतीर्थं महापुण्यं विद्यते पापनाशनम् ॥ ४५ ॥
तस्मिन् श्राद्धं प्रकुर्वीत स्वायाद्दानानि दापयेत् ॥
गच्छन्ति पितरस्तेन प्राप्यते वाञ्छितं फलम् ॥४६॥
दृश्यते शतसाहस्रं ज्योतिषां बिन्दुसञ्चयम् ॥
तत्पार्श्वे संस्थितं विश्वग् व्यक्तं चाव्यक्तमेवच ॥४७॥
मिष्टान्नैर्ब्राह्मणांस्तत्र भोजयेन्मनुजो यदि ॥
ब्रह्महत्यागुरुद्रोहस्वामिद्रोहादिकैस्तथा ॥ ४८ ॥
पातकं संचितं यद्यत्तत्सर्वं तस्य नश्यति ॥
सत्यं ब्रवीमि ते विप्र! नान्यथा मम भाषितम् ॥४९॥

इति श्रीस्कन्दपुराणोक्तहिमवत्खण्डान्तर्गतज्वालामाहात्म्ये
चतुर्थोऽध्यायः ॥ ३

स्कन्द उवाच ॥
किं सत्यं किं फलं चैव कश्च पूजाविधिक्रमः ॥
ज्वालादेव्या मम ब्रूहि भगवन्! विस्तरादिह ॥१॥

स्कन्द उवाच ॥
सत्यं सत्यं प्रवक्ष्यामि वैश्वानरविधिं क्रमात् ॥
कृताधिवासनं तत्र पूजयेत्पावकं नरः ॥ २ ॥
गुप्तानां चैव सर्वेषां प्रत्यक्षाणां च कर्मणाम् ॥
द्रष्टा कालाग्निरुद्रस्तु ज्वालारूपी सुराननः ॥ ३ ॥
नराः सुकृतिनस्तत्र ज्वालां देवीं सनातनीम् ॥
पश्यन्ति गुप्तरूपेण स्थितां ना सुकृती क्वचित् ॥ ४ ॥
ईश्वरं पूजयेत्तत्र मातृकागणसंयुतम् ॥
लक्षजापः प्रकर्तव्यो होमं कुर्याच्छतांशकम् ॥ ५॥

ध्यानम्

शक्तिं वह्निं स्रुक्श्रुवौ सव्यहस्तै-
र्वामैर्हस्तैस्तोमरं तालवृन्तम् ॥
सर्पिःपूर्णं तप्तसौवर्णपात्रं
शश्वद् ध्यायेत् सप्तजिह्वां दधानाम् ॥ १ ॥

जपमन्त्रः—

ॐ ऐं ह्रीं नमो वैश्वानराय ॥
ॐ क्रां क्रीं क्रूं क्रैं क्रौं क्रः अनेन षडङ्गन्यासः ॥

रक्षामन्त्रः—

आधारे चैवमोङ्कारं नकारं हृदये तथा ॥
मोकारं वदने न्यस्य वैकारं दक्षकन्धरे ॥ ६ ॥
वामस्कन्धे श्वाक्षरं तु नकारं हुबामूलके ॥

राक्षरं हृदिमध्ये च यकारं कण्ठकूपके ॥ ७ ॥

ततो वैश्वानरगायत्री–

ॐ वैश्वानराय विद्महे सप्तजिह्वाय धीमहि! तन्नोऽग्निः प्रचोदयात् ॥

अग्निन्दूतेतिमन्त्रेण वैश्वानरोनऊतये ॥

धामच्छदग्निरित्यादिमन्त्रैः कुर्यात्प्रदक्षिणाः ॥ ८ ॥

ततो होमं प्रकुर्वीत विधिना घृतपायसैः

शुद्धदेहस्ततो भूत्वा पिबेत्तस्य रसायनम् ॥ ९ ॥

अश्वत्थदलमध्यस्थं कृत्वा च पलसम्मितम् ॥

रसायनं सोदकन्तु पिबेच्चैव समन्त्रकम् ॥ १० ॥

नैवेद्यं देवताभ्यश्च दत्वा हुत्वा धनञ्जये ॥

शुचिः समाहितो भूत्वा सघृतं मधुसंयुतम् ॥ ११ ॥

प्रगृह्याश्वत्थपत्रस्थं पलमेकं च भक्षयेत् ॥

द्वयोश्च कुण्डयोर्मध्ये स्थित्वा धर्मशिलान्तिकम् ॥ १२ ॥

रसायनस्य पाने तु प्रणवेन समन्विताम् ॥

प्रजपेद्वह्निगायत्रीं स्मरन् वह्निमयं महः ॥ १३ ॥

सोमपानेन सदृशं वैश्वानरमुखश्रितम् ॥

पीत्वा प्रमुच्यते सद्यः पातकैरुपपातकैः ॥ १४ ॥

अश्वमेधाधिकं पुण्यं मनुष्याणां प्रजायते ॥

रसायनस्य पानेन नात्र कार्या विचारणा ॥ १५ ॥

आयुष्यकामः सहविर्धनकामो मधुप्लुतम् ॥

मृतवत्सा गर्भहीना काकवन्ध्याऽरजस्विनी ॥ १६ ॥
क्षीरेण सह पीत्वा च सर्वदोषैर्विमुच्यते ॥
वन्ध्या प्रसूयते पुत्रं मृतवत्सा प्रजीविनी ॥ १७ ॥
दुर्भगा सुभगा चैव भवेत्तत्पानतो ध्रुवम् ॥
रोगी त्वामलकैः सार्द्धं पीत्वा रोगैः प्रमुच्यते ॥ १८ ॥
स्नानमात्रेण रोगास्तु नरदेहसमुद्भवाः ॥
सद्य एव विनश्यन्ति पातकैर्विविधैः सह ॥ १९ ॥
बहुना किमिहोक्तेन पुनर्जन्म न विद्यते ॥
रसायनस्य पानेन स्नानाच्चैव विशेषतः ॥ २० ॥
एवं रसायनं प्रोक्तं सर्ववाञ्छितसिद्धिदम् ॥
तव स्नेहान्मुने ! सत्यं नान्यथा मम भाषितम् ॥ २१ ॥
ज्वालां कालाग्निरुद्रीयां पश्यन् पीतामृतस्य च ॥
मुच्यते सर्वपापेभ्यः सद्य एव न संशयः ॥ २२ ॥
ततः कृताञ्जलिर्भूत्वा ज्वालां देवीं सनातनीम् ॥
स्तुवीत परया भक्त्या वह्निमन्त्रैस्तथा परैः ॥ २३ ॥
वैदिकैस्तान्त्रिकैश्चैव बद्धपद्मासनो नरः ॥
पावकस्य च प्रीत्यर्थं सर्वदेवमयस्य तु ॥ २४ ॥

स्तुतिः—

भगवति ! भवबन्धव्यापृतं ज्ञानशून्यं
विविधविषयचिन्ताजर्जरं तापतप्तम् ॥
अतनु तनुवनोत्थं शुष्कहृत्काष्ठमेत-

त्तव विमलशिखाग्रे ज्वालिके संजुहोमि॥ २५ ॥
सपदि कलुषवृन्दं जन्मजन्मान्तरोत्थं
यदिह मम शरीरे विद्यते देवि! सर्वम् ॥
दहदह कुरु सद्यो भस्मसात्तत्समन्ता-
न्निजविमलशिखाभिः सर्वतो विस्तृताभिः॥२६॥
हरनिटिलनिवासे! दिव्यदीप्तिप्रकाशे!
भगवति! मयि दासे चारुहासे! प्रसीद ॥
नहि जननि! जगत्यां लक्षये व्यक्तरूपां
कलुषदहनदीक्षाबद्धकक्षां त्वदन्याम् ॥ २७ ॥
त्वमसि शमनरूपा देवि! कल्पावसाने
मदनदहनकाले शाम्भवी दृक्कराला ॥
दशरथसुतसत्रे त्वं सवित्रीप्सितस्य
नहि तव परमार्थं वेत्ति रूपस्य कोऽपि॥ २८॥
कलुषनिवहहन्त्रीं दुर्लभाद्रौ वहन्तीं
निजरुचिरशिखाभिः सर्वदोषान्धमन्तीम् ॥
सततशिशिरनीरप्रोच्चधाराभिराराद्
गिरिगहनगुहाभ्यो निःसृतां त्वां नमामि २९
यः श्लोकपञ्चकमिदं शिखिनः समीपे
स्थित्वा च दुर्लभगिरौ प्रयतः पठेत ॥
तस्य प्रसीदतितरां ज्वलनस्य शक्ति-
र्ज्वालात्मिका भगवती भवभीतिहन्त्री॥ ३० ॥

विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
सौभाग्यसन्ततिसुखं चिरजीवितां च ॥
तस्मै ददाति सततं स्तुतिभिः प्रसन्ना
भक्ताय भव्यनिलयाय निजाश्रिताय ॥ ३१ ॥
भूतप्रेतपिशाचेभ्यो दुर्ग्रहेभ्यस्तथैवच ॥
न भयं विद्यते तस्य ज्वालां यः स्तौति भक्तितः॥३२॥
दुर्विनीताय दुष्टाय नास्तिकाय शठाय च ॥
न देयं स्तोत्रमेतद्धि ज्वालादेव्याः कदाचन ॥ ३३ ॥
स्कन्द उवाच ॥
एवं स्तुत्वा तदा देवीं ज्वालामीश्वरदृग्भवाम् ॥
क्षमाप्य च प्रणामाद्यैस्ततोऽन्यत्र व्रजेच्छुचिः ॥ ३४ ॥
ब्रह्मकुण्डोर्ध्वभागे च श्वेतद्वीपप्रतिष्ठितम् ॥
तस्य मध्ये चास्ति पुण्या नदी रुद्रावती शुभा ॥ ३५ ॥
तस्य चापरभागे च नदी पद्मावतीत्यपि ॥
द्वयोश्च संगमे तत्र चास्ति प्रेतशिलाभिधा ॥ ३६ ॥
तस्यां तिलान् सकुमिश्रान् कृत्वा प्रेतत्वमुक्तये ॥
अन्तर्जले नरः स्नात्वा कुर्याच्छ्राद्धं विशेषतः॥ ३७ ॥
तस्यैव सफलं कर्म तस्यैव सफलाः क्रियाः ॥
तस्यैव सफलं राज्यं तस्यैव सफलं धनम् ॥ ३८ ॥
कुलानां शतमुद्धृत्य दशपूर्वान् दशावरान् ॥
कुरुते जन्मसाफल्यं तस्यैव सफलं तपः ॥ ३९ ॥

यः करोति नमस्कारं कालाग्नेर्दर्शनं तथा ॥
सर्वपापविशुद्धात्मा शिवलोकं स गच्छति ॥ ४० ॥
रुद्रपद्मावतीनद्योर्मध्ये चानलदेवता ॥
तत्र श्राद्धं प्रकुर्वीत गयाश्राद्धाधिकं फलम् ॥ ४१ ॥
रुद्रपद्मावतीतीर्थसन्निधौ दक्षिणे तटे ॥
नासाचक्षुर्ललाटं च ज्वालादेव्याः प्रतिष्ठितम् ॥ ४२ ॥
तेषां दर्शनमात्रेण मुच्यते सर्वपातकैः ॥
तत्र होमे कृते सद्यो गोसहस्रफलं लभेत्॥४३॥
तस्य पार्श्वे तथा श्रोत्रं तत्रोपरि शिला तथा ॥
ज्वालादेव्या विजानीयाद्धोमं दानं च कारयेत् ॥४४॥
तत्रैव माधवो नाम दृश्यते पर्वतो महान् ॥
तन्मध्ये दृश्यते पुण्या मालिकाख्या नदी शुभा ॥४५॥
तस्यां हुत्वा समभ्यर्च्य स्नात्वा चैव विशेषतः ॥
मनोवाक्कायजं सर्वं निर्दहेत्पातकं नरः ॥ ४६ ॥
तस्य पूर्वे परं पुण्यं कोटीतीर्थं च विद्यते ॥
तस्मिन् प्रदक्षिणीकृत्य कोटीयज्ञफलं भवेत् ॥ ४७ ॥
दुग्धेश्वरं महालिङ्गं कोटीतीर्थस्य दक्षिणे ॥
त्रिवेणीमध्यतस्तत्र दृश्यते पापनाशनम् ॥ ४८ ॥
तं नत्वाऽभ्यर्च्य विधिवद् दुग्धं चापि समर्पयेत् ॥
तेन तृप्यन्ति पितरो देवाश्च मुनिपुङ्गव ! ॥ ४९ ॥
कोटीतीर्थस्य पार्श्वे तु सिद्धगङ्गा प्रदृश्यते ॥

तत्र स्नानेन विधिवच्चिन्तितं फलमश्नुते ॥ ५० ॥
तत्रैव विधिना श्राद्धं पिण्डदानपुरस्सरम् ॥
स्वर्णवस्त्रान्नदानं च तदनन्तगुणं भवेत् ॥ ५१ ॥
कोटीतीर्थस्य मध्ये यच्छिवलिङ्गं प्रतिष्ठितम् ॥
तस्य कुर्याद्विशेषेण पूजां भक्तिसमन्वितः ॥ ५२ ॥
धूपैर्दीपैश्च नैवेद्यैः पुष्पैश्च विविधैरपि ॥
वस्त्रध्वजान्नदानैश्च प्रदक्षिणविधानतः ॥ ५३ ॥
पश्चादर्घ्यं प्रदत्वा तु नमस्कृत्य यथाविधि ॥
भोजयेद् ब्राह्मणांश्चैव पायसैर्घृतमोदकैः ॥ ५४ ॥
ततः सुरान् पितॄंश्चैव तर्पयित्वा समन्ततः॥
श्रुत्वा माहात्म्यमेतच्च वाञ्छितार्थं लभेन्नरः ॥ ५५ ॥
त्रयस्त्रिंशत्कोटिदेवाः सिद्धगन्धर्वसंयुताः ॥
तिष्ठन्ति सर्वदा चास्मिन् कालामेरत्र मण्डले ॥ ५६ ॥

इतिश्रीस्कन्दपुराणान्तर्गतहिमवत्खण्डोक्तज्वालामाहात्म्ये
पञ्चमोऽध्यायः ॥ ३

स्कन्द उवाच ॥
अथ यात्राक्रमं वक्ष्ये शृणु चैकाग्रमानसः ॥
यातॄणामुपकाराय यात्राकाले सुखाय च ॥ १ ॥
सिद्धेश्वरं समभ्यर्च्य दृष्ट्वा च स्वामिकार्तिकम् ॥
विलोक्य पादुकाङ्गुष्ठधूलीनाभीन्द्रियस्थितिम् ॥ २ ॥

मुखनासिकनेत्राणां स्थानानि च विशेषतः ॥
वेणीप्रेतशिले चैव दृष्ट्वा नत्वा ततः परम् ॥ ३ ॥
प्रदक्षिणक्रमेणैव कोटीतीर्थं ततो व्रजेत् ॥
तत्र सोमं महेशानं पूजयेद्विधिपूर्वकम् ॥ ४ ॥
मालतीसरिति स्नात्वा समभ्यर्च्य च माधवम् ॥
सिद्धासनं समालोक्य पूजयेत्तत्र शङ्करम् ॥ ५ ॥
अभिवासनकं कुर्यात्तत्रैव विधिपूर्वकम् ॥
यात्रामेनां तु मुनयो वदन्ति हरिशङ्करीम् ॥ ६ ॥
ज्वालाक्षेत्रस्य माहात्म्यं शिवोक्तं हरिसन्निधौ ॥
व्यासाय विष्णुना प्रोक्तं तन्मयात्र प्रकाशितम् ॥७॥
सर्वपापप्रशमनं भुक्तिमुक्तिफलप्रदम् ॥
शृण्वन्ति ये नराश्चैतत्ते लभन्ते समीहितम् ॥ ८ ॥
शान्ताय शुद्धमतये कथनीयं प्रयत्नतः ॥
दुष्टाय शूद्ररूपाय न वक्तव्यं त्वया मुने ! ॥ ९ ॥
पठनाच्छ्रवणाद्दानात्पुस्तकस्य विशेषतः ॥
शिवसायुज्यमाप्नोति नरो भक्तिसमन्वितः ॥ १० ॥
ज्वालादेवी महापुण्या ज्वालाक्षेत्रं महाद्भुतम् ॥
ज्वालाक्षेत्रस्य स्थानानि सर्वमेतत्सुदुर्लभम् ॥ ११ ॥
कोटिजन्मोद्भवं पुण्यं यस्य देहे प्रतिष्ठितम् ॥
स एव पावके ह्यस्मिन् क्षेत्रे प्राप्नोति संस्थितिम् ॥१२॥
नहि स्वल्पेन पुण्येन ज्वालाक्षेत्रस्य दर्शनम् ॥

प्राप्यते मानवैर्लोके सत्यमेतद् ब्रवीम्यहम् ॥ १३ ॥
ये नराः पावके क्षेत्रे प्राप्य जन्म सुदुर्लभम् ॥
सेवन्ते पावकं देवं धन्यास्ते कीर्तिता भुवि ॥ १४ ॥
तस्मात्सर्वैः सदा सेव्यं ज्वालाक्षेत्रं मनोहरम् ॥
आयुरारोग्यदं पुण्यं स्वर्गमोक्षप्रदं तथा ॥ १५ ॥
इत्येवमुक्त्वा सेनानीरगस्त्यं मुनिपुङ्गवम् ॥
विरराम मुनिः सोऽपि तं प्रणम्य प्रहर्षितः ॥ १६ ॥
ज्वालाक्षेत्रं ततो गत्वा समभ्यर्च्य च पावकम् ॥
समाप्य यात्रां विधिवत्प्रीतात्मा स्वाश्रमं ययौ ॥ १७ ॥

इतिश्रीस्कन्दपुराणोक्तहिमवत्खण्डान्तर्गतज्वालामाहात्म्ये कुमाराऽगस्त्यसंवादे षष्ठोऽध्यायः ॥ ६ ॥

समाप्तमिदं ज्वालामाहात्म्यम्.

शुभम्.

25.4